॥ श्री गुरुभ्यो नमः । हरिः ॐ ॥

ॐ

# श्री सिद्धि विनायक पूजा विधानम्

ध्रुवन्ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
द्रुवन्त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥
सुलग्ना सावाधान । सुमुहूर्ता सवाधाना । श्री महागणपति ध्याना सावधाना ।

अथ घण्ठानादः

**आगमार्थं तु देवानां गमनार्थं तु रक्षसां ।**
**कुर्वे घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥**

अथ गणेश प्रार्थना

**शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।**
**प्रसन्न वदनं ध्यायेत् सर्वविघ्नोपशांतये ॥**

**ॐ सुमुखाय नमः । ॐ एकदन्ताय नमः । ॐ कपिलाय नमः ।**
**ॐ गजकर्णकाय नमः । ॐ लंबोदराय नमः । ॐ विकटाय नमः ।**
**ॐ विघ्नराजाय नमः । ॐ गणाध्यक्षाय नमः । ॐ धूमकेतवे नमः ।**
**ॐ गणाधिपाय नमः । ॐ फालचन्द्राय नमः । ॐ गजाननाय नमः ।**
ॐ श्री महागणपतये नमः - नाम पूजां समर्पयामि ।
ॐ श्री महागणपतये नमः - नानाविध पत्र पुष्पाणि समर्पयामि ।
ॐ श्री महागणपतये नमः - धूपमाघ्रापयामि ।
ॐ श्री महागणपतये नमः - दीपं दर्शयामि ।
ॐ श्री महागणपतये नमः - नैवेद्यं समर्पयामि ।
ॐ श्री महागणपतये नमः - नीराजनं समर्पयामि ।
ॐ श्री महागनपथये नमः - समस्त भक्त्योपचारान् समर्पयामि ।

अथ संकल्पः

प्रणवस्य परब्रह्म ऋषिः | परमात्मा देवता | गायत्री छन्दः | आसनः प्राणायामे विनियोगः |

ॐ भूः ॐ भुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं

ॐ तत्सवितृ वरेण्यं भर्गो देवस्य धीमहि | धीयो यो नः प्रचोदयात् |

ओमापः ज्योतीरसः अमृतं ब्रह्म भूर्भुवस्सुवरोम् |

ममोपात्त समस्त दुरितक्षयद्वारा ಆದ್ಯ ಬ್ರಾಹ್ಮಣಃ ದ್ವಿತೀಯಪರಾರ್ಧೇ ವೈವಸ್ವತ ಮನ್ವಂತರೇ ಕಲಿಯುಗೇ ಪ್ರಥಮೇ ಪಾದೇ ಷಷ್ಠಿ ಸಂವತ್ಸರಾಣಾಂ ಮಧ್ಯೇ ವಿಕಾರೀ ನಾಮ ಸಂವತ್ಸರೇ ದಕ್ಷಿಣಾಯನೇ ಧನುರ್ ಮಾಸೇ ಶುಕ್ಲ ಪಕ್ಷೇ ಬುಧ ವಾಸರೇ ಸಪ್ತಮ್ಯಾಂ ಶುಭ ತಿಥೌ ಶುಭ ನಕ್ಷತ್ರೇ

अस्मिन् मुहूर्ते अस्माकं सह कुटुम्बानां अस्य बन्धु मित्राणां

ನೂತನ ವರ್ಷಾರಂಭಣ ಸಮಯೇ

ಜ್ಞಾನ ವೈರಾಗ್ಯ ವಿದ್ಯಾ ವಿನಯ ವೀರ್ಯ ವಿಜಯ ಆಯುಃ ಆರೋಗ್ಯ

ಸಕಲ ಪುರುಷಾರ್ಥ ಸಿಧ್ಯರ್ಥಂ ಮಂಗಳಕರ ಸಕಲ ಅವಾಪ್ಯರ್ಥಂ

श्री ಸಿದ್ಧಿ ವಿನಾಯಕ ಸ್ವಾಮಿ ಪ್ರೀತ್ಯರ್ಥಂ

श्री ಸಿದ್ಧಿ ವಿನಾಯಕ ಸ್ವಾಮಿಂ ಉದ್ದಿಶ್ಯ

श्री ಸಿದ್ಧಿ ವಿನಾಯಕ पुजां ಕರಿಷ್ಯೇ ||

अथ ध्यानं

**ಗಣಾಧಿಪ ನಮಸ್ತುಭ್ಯಂ ಸರ್ವ ಸಿದ್ಧಿ ಪ್ರದಾಯಕ |**

**ಗೃಹಾಣ ದೇವದೇವೇಶ ಗಣೇಶಃ ಪ್ರೀಯತಾಮಿತಿ ||**

**ಧ್ಯಾಯೇತ್ ಗಜಾನನಂ ದೇವಂ ತಪ್ತಕಾಂಚನ ಸುಪ್ರ ಭಂ |**

**ಚತುರ್ಭುಜಂ ಮಹಾಕಾಯಂ ಸೂರ್ಯಕೋಟಿ ಸಮಪ್ರಭಂ ||**

ॐ श्री सिद्धिविनायक स्वामिने नमः | ध्यानं समर्पयामि ||

अथ आवाहनं

**ಆಗಚ್ಛ ವಿಘ್ನ ರಾಜೇಂದ್ರ ಸ್ಥಾನೇ ಚಾತ್ರ ಸ್ಥಿರೋ ಭವ |**

**ಆರಾಧಯಿಷ್ಯೇ ಭಕ್ತೊಹಂ ಭವಂತಂ ಸರ್ವಸಿದ್ಧಿದಂ ||**

ಸಿಂಧೂರಾರುಣ ವರ್ಣಾಭಂ ಕುಂಕುಮಾನ್ಕಿತ ಮಾಲಿನಂ ।
ಸರ್ವವಿಘ್ನ ಕ್ಷಯಕರಂ ಸಿದ್ಧಿದಂ ಸರ್ವಕಾಮದಂ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | आवाहनं समर्पयामि ||

अथ आसनम्

ಅಸ್ಮಿನ್ ಸ್ಥಾನೇ ಅಖಿಲಾರಾಧ್ಯ ಸರ್ವಾಲಂಕಾರ ಭೂಷಿತ ।
ಉಪವಿಶ್ಯ ಗಣಾಧ್ಯಕ್ಷ ಕಾರ್ಯ ಸಿದ್ಧಿಂ ಕುರುಶ್ವ ಮೇ ॥
ಚತುರ್ಭುಜಂ ಮಹಾಕಾಯಂ ಪೂರ್ಣ ಚಂದ್ರ ಸಮಪ್ರಭಂ ।
ಏಕದಂತಂ ಶೂರ್ಪಕರ್ಣಂ ಪೂರ್ಣ ಮೋದಕ ಧಾರಿಣಂ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | आसनम् समर्पयामि ||

अथ पाद्यम्

ಇಂದ್ರಾದಿವಂದಿತಂ ದೇವಂ ಸಿದ್ಧಗಂಧರ್ವ ಸೇವಿತಂ ।
ಪಾದ್ಯಂ ಗೃಹಾಣ ದೇವೇಶ ವಿನಾಯಕ ನಮೋಸ್ತುತೇ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | पाद्यम् समर्पयामि ||

अथ अर्घ्यम्

ಗಜಾನನ ಮಹಾಕಾಯ ನಾಗಯಜ್ಞೋಪವೀತಿನೇ ।
ಸೂರ್ಯಕೋಟಿ ಪ್ರತೀಕಾಶ ಗೃಹಾಣಾರ್ಘ್ಯಂ ನಮೋಸ್ತುತೇ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | अर्घ्यम् समर्पयामि ||

अथ आचमनीयं

ವಿಘ್ನೇಶ ದೇವದೇವೇಶ ಸರ್ವಸಿದ್ಧಿ ಪ್ರದಾಯಕ ।
ಮಯಾದತ್ತಂ ಗಜಮುಖ ಗೃಹಾಣಾಚಮನೀಯಕಂ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | आचमनीयं समर्पयामि ||

अथ स्नानीयं

ಗಂಗಾಜಲ ಸಮಾಯುಕ್ತಂ ಸುವರ್ಣ ಘಟಪೂರಿತಂ ।
ಗೃಹಾಣತ್ವಂ ಮಯಾದತ್ತಂ ಸ್ನಾನಂ ಚ ದ್ವಿರದಾನನ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | स्नानीयं समर्पयामि ||

अथ पञ्चामृत स्नानं

ಕಾಮಧೇನು ಸಮುದ್ಭೂತಮ್ ಪರಮಂ ಪಾವನಂ ಪಯಃ ।
ತೇನ ಸ್ನಾನಂ ಕುರುಶ್ವ ತ್ವಂ ಹೇರಂಬ ಗಣನಾಯಕ ।

**ॐ श्री सिद्धिविनायक स्वामिने नमः क्षीरेणस्नपयामि ।**

ಚಂದ್ರ ಮಂಡಲ ಸಂಕಾಶಂ ಸರ್ವದೇವಪ್ರಿಯಂ ದಧಿ ।
ಸ್ನಾನಾರ್ಥಂ ತೇ ಪ್ರಯಚ್ಛಾಮಿ ಗೃಹಾಣ ಗಣನಾಯಕ ॥

**ॐ श्री सिद्धिविनायक स्वामिने नमः दध्यास्नपयामि ।**

ಆಜ್ಯಂ ಸುರಾಣಾಂ ಆಹಾರ ಆಜ್ಯಂ ಯಜ್ಞೇ ಪ್ರತಿಷ್ಠಿತಂ ।
ಆಜ್ಯಂ ಪವಿತ್ರಂ ಪರಮಂ ಸ್ನಾನಾರ್ಥಂ ಪ್ರತಿಗೃಹ್ಯತಾಂ ॥

**ॐ श्री सिद्धिविनायक स्वामिने नमः आज्येनस्नपयामि ।**

ಸರ್ವೌಷಧಿ ಸಮಾಯುಕ್ತಂ ಪೀಯುಷ ಸದೃಶಂ ಮಧು ।
ಸ್ನಾನಾರ್ಥಂ ತೇ ಪ್ರಯಚ್ಛಾಮಿ ಗೃಹಾಣ ಗಿರಿಜಾಸುತ ॥

**ॐ श्री सिद्धिविनायक स्वामिने नमः मधुनास्नपयामि ।**

ಇಕ್ಶುದಂಡ ಸಮುದ್ಭೂತ ದಿವ್ಯಶರ್ಕರಾಹ್ಯಹಂ ।
ಸ್ನಾಪಯಾಮಿ ಮಹಾಭಾಕ್ತ್ಯಾ ಪ್ರೀತೋಭವ ಶಿವಾತ್ಮಜಾ ॥

**ॐ श्री सिद्धिविनायक स्वामिने नमः शर्करयास्नपयामि ।**

ಸುಫಲೈಶ್ಚ ಫಲೋದ್ರ್ವೈವಾ ಫಲಾನಾಂ ಚ ರಸೈರ್ಯುತಂ ।
ಫಲೋದಕಂ ಮಯಾದತ್ತಂ ಗೃಹಾಣ ಗಣನಾಯಕ ॥

**ॐ श्री सिद्धिविनायक स्वामिने नमः फलोदकेनस्नपयामि ।**

**ॐ श्री सिद्धिविनायक स्वामिने नमः । पञ्चामृत स्नानं समर्पयामि ॥**

ಗಂಗಾದಿ ಸಲಿಲಂ ಶುಧ್ಧಂ ಸುವರ್ನಕಳಷೇ ಸ್ತಿಥಂ ।
ಸುವಾಸಿತಂ ಪರಿಮಲೈಃ ಸ್ನಾಪಯಾಮಿ ಗಣೇಶ್ವರ ॥

**ॐ श्री सिद्धिविनायक स्वामिने नमः पञ्चामृत स्नानान्तरं शुद्धोदक स्नानं समर्पयामि ।**

अथ वस्त्रम्

ರಕ್ತವರ್ಣಂ ವಸ್ತ್ರಯುಗ್ಮಂ ಸರ್ವಕಾಮಾರ್ಥಸಿದ್ಧಯೇ ।
ಮಯಾದತ್ತಂ ಗಣಾಧ್ಯಕ್ಷ ಗೃಹ್ಯತಾಮಖಿಲಾರ್ಥದ ॥
ನಭಃ ಕರ್ಪಾಸಜಂ ದೇವದೇವಾಂಗ ಸದೃಶಂ ಪ್ರಭೋ ।
ಗೃಹಾಣ ದೇವದೇವೇಶ ವಸ್ತ್ರಯುಗ್ಮಂ ಚ ಭಕ್ತಿತಃ ॥

ॐ श्री सिद्धिविनायक स्वामिने नमः | वस्त्रम् समर्पयामि ॥

ಅಥ ಯಜ್ಞೋಪವೀತಮ್

ಧಾರಣಾರ್ಥಂ ಬ್ರಹ್ಮಸೂತ್ರಂ ಸೌವರ್ಣಂ ಚೋತ್ತರೀಯಕಂ ।
ವಕ್ರತುಂಡ ಗೃಹಾಣೇದಂ ಭಕ್ತಾನಾಂ ವರದಾಯಕ ॥

ॐ श्री सिद्धिविनायक स्वामिने नमः | ಯಜ್ಞೋಪವೀತಂ समर्पयामि ॥

गन्धम्

ಚಂದನಾಗರು ಕರ್ಪೂರ ಕುಂಕುಮೇನ ಸಮನ್ವಿತಂ ।
ಗಂಧಂ ಗೃಹಾಣ ದೇವೇಶ ಸರ್ವಸಿದ್ಧಿ ಪ್ರದಾಯಕ ॥

ॐ श्री सिद्धिविनायक स्वामिने नमः | गन्धम् समर्पयामि ॥

अथ अक्षतः हरिद्रा कुङ्कुम इत्यादि

ಅಕ್ಷತಾಂ ಚ ಸುರಶ್ರೇಷ್ಟ ಕುಂಕುಮಾಕ್ತಾನ್ ಸುಶೋಭನಾನ್ ।
ಗೃಹಾಣ ವಿಘ್ನರಾಜೇಂದ್ರ ರುದ್ರಪ್ರಿಯಾಯ ನಮೋಸ್ತುತೇ ॥

ॐ श्री सिद्धिविनायक स्वामिने नमः | अक्षतान् समर्पयामि |

अथ पुष्पम्

ರಕ್ತಪುಷ್ಪಾಣಿ ಸರ್ವೇಶ ಏಕವಿಂಶತಿ ಸಂಖ್ಯಯಾ ।
ಗೃಹಾಣ ಸುಮುಖೋ ಭೂತ್ವಾ ಮಯಾದತಾನ್ಯುಮಾಸುತ ॥
ಕಮಲೋತ್ಪಲ ಕಲ್ಹಾರ ಪುನ್ನಾಗ ಬೃಹತೀನಿ ಚ ।
ನಾನಾವಿಧಾನಿ ದಿವ್ಯಾನಿ ಪುಷ್ಪಾಣಿ ಪ್ರತಿಗೃಹ್ಯತಾಂ ॥

ॐ श्री सिद्धिविनायक स्वामिने नमः | नानाविध परिमल पत्र पुष्पाणि समर्पयामि ॥

अथ अष्टोत्तर शतनामावली

***// श्री ವಿನಾಯಕ अष्टोत्तर शतनामावली //***

ॐ श्री सिद्धिविनायक स्वामिने नमः | अष्टोत्तर शतनामावली समर्पयामि ॥

अथ धूपम्

ದಶಾಂಗಂ ಗುಗ್ಗುಲೋಪೇತಂ ಧೂಪಮುತ್ತಮಂ ಗಣನಾಯಕ ।
ಗೃಹಾಣ ದೇವದೇವೇಶ ಉಮಾಸುತ ನಮೋಸ್ತುತೇ ॥
ವನಸ್ಪತಿ ರಸ್ಯೈರ್ದಿವ್ಯೈ ಗಂಧಾದ್ಯೈಃ ಗಂಧ ಉತ್ತಮೈಃ ।
ಆಘ್ರೇಯಃ ಸರ್ವದೇವಾನಾಂ ಧೂಪೋಯಂ ಪ್ರತಿಗೃಹ್ಯತಾಂ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | धूपं आघ्रापयामः ||

अथ दीपम्

ಘೃತವರ್ತಿ ಸಂಯುಕ್ತಂ ದೀಪಂ ಜ್ಞಾನಪ್ರಕಾಶಕಂ ।
ಗೃಹಾಣೇದಂ ಮಯಾದತ್ತಂ ತೇಜೋರಾಶೇ ಜಗತ್ಪತೇ ॥
ಸಾಜ್ಯಂ ತ್ರಿವರ್ತಿ ಸಂಯುಕ್ತಂ ವಹ್ನಿನಾ ಯೋಜಿತಂ ಮಯಾ ।
ಭಕ್ತ್ಯಾ ದೀಪಂ ಪ್ರದಾಸ್ಯಾಮಿ ಗೃಹಾಣ ಗಣನಾಯಕ ॥
ॐ श्री सिद्धिविनायक स्वामिने नमः | एकार्ति दीपम् दर्शयामि ||

अथ नैवेद्यम्

ನೈವೇದ್ಯಂ ಗೃಹ್ಯತಾಂ ದೇವ ನಾನಾಮೋದಕ ನಮ್ಯುತಂ ।
ಪಕ್ವಾನ್ನ ಫಲ ಸಂಯುಕ್ತಂ ಶಡ್ರಸೈಶ್ಚ ಸಮನ್ವಿತಂ ॥
ಅನ್ನಂ ಚತುರ್ವಿಧಂ ಸ್ವಾದು ರಸೈಃ ಷಡ್ಭಿಃ ಸಮನ್ವಿತಂ ।
ಭಕ್ತ್ಯಾ ನಿವೇದಿತುಂ ದೇವ ನೈವೇದ್ಯಂ ಪ್ರತಿಗೃಹ್ಯತಾಂ ॥
ॐ अमृतमस्तु अमृतोपस्थरणमसी स्वाहा |
ॐ प्राणाय स्वाहा | ॐ अपानाय स्वाहा | ॐ व्यानाय स्वाहा |
ॐ उदानाय स्वाहा | ॐ समानाय स्वाहा | ॐ ब्रह्मणे स्वाहा ||
ॐ श्री सिद्धिविनायक स्वामिने नमः | नैवेद्यम् निवेदयामि ||

अथ मन्गळनिराजनं

ಪಂಚವರ್ತೀ ಸಮಾಯುಕ್ತಂ ವಹ್ನಿನಾಯೋಜಿತಂ ಮಯಾ ।
ಗೃಹಾಣ ಮಂಗಳಂ ದೀಪಂ ವಿಘ್ನರಾಜ ನಮೋಸ್ತುತೇ ॥
नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेस्तु लंबोदराय
एकदंताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः ||
ॐ श्री सिद्धिविनायक स्वामिने नमः | मन्गळनिराजनं समर्पयामि ||

अथ मन्त्रपुष्पं

ನಮೋ ನರಗಜಾಕೃತೇ ನಲಿನದೇಹಾಕೃತೇ
ನರಾಸುರ ಸುರೇಡಿತಾ ಶ್ರುತಿಶಿರೋದ್ಯದೊಂಘ್ರಿ ದ್ವಯಾ।
ನಗೇಶ್ವರ ವರಾತ್ಮಜಾ ನಯನಪದ್ಮ ಭಾನೋಮಯಾ
ನತಾರ್ತಿಹರಣಾಂ ಘ್ರೀಯಕ್ ಕಲಿತಮಿವ ಪುಷ್ಪಾಂಜಲಿಃ ॥
ತತ್ಪುರುಸ್ಹಾಯ ವಿದ್ಮಹೇ ವಕ್ರತುಂಡಾಯ ಧೀಮಹಿ। ತನ್ನೋ ದಂತಿಃ ಪ್ರಚೋದಯಾತ್॥

**योपां पुष्पं वेद | पुष्पवान् प्रजावान् पशुमान् भवति | चन्द्रमा वा अपां पुष्पं | पुष्पवान् प्रजावान् पशुमान् भवति | य एवं वेद | योऽपामायतनं वेद | आयतनवान् भवति ||**

**यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः | तस्यः प्रकृति लीनस्य यः परः स्समहेष्वरः ||**

ॐ श्री सिद्धिविनायक स्वामिने नमः | मन्त्रपुष्पं समर्पयामि ||

अथ प्रदक्षिण नमस्कार

**यानि कानि च पापानि जन्मान्तर कृतानि च |**
**तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ||**

ॐ श्री सिद्धिविनायक स्वामिने नमः | प्रदक्षिण नमस्कारान् समर्पयामि ||

अथ पुनः पूजा

ॐ श्री सिद्धिविनायक स्वामिने नमः समस्त राजोपचारान् भक्त्योपचारान् शक्त्योपचरान् समर्पयामि ||

अथ प्रायश्चित्त

**यस्यस्मृत्याच नामोक्त्या तपः पूजा क्रियादिषु |**
**न्यूनं संपूर्णतां यातु तद्यो वन्दे तमच्युतं ||**
**मन्त्रहीनं क्रियाहीनं भक्तिहीनं गणेश्वर |**
**यत्पूजितं मया देवा परिपूर्णं कुरुष्व मे ||**

अथ क्षमापणम्

**आवाहनं न जानामि न जानामि विसर्जनम् ।**
**पूजां चैव न जानामि क्षमस्व परमोत्तम ॥**
**अन्यथा शरणं नास्ति त्वमेव शरणं मम ।**
**तस्मात् कारुण्य भावेन रक्ष रक्ष पुरुषोत्तम ॥**

अथ आत्मनिवेदनम्

**कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मनावा प्रकृतेः स्वभावात् ।**
**करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥**

अथ उद्यापनम्

**शोभनार्थे शुभमुहुर्ते दिने दिने पुनरागमनायच ।**
**प्रसीद प्रसीद तुष्ट्यर्थं प्रविश्य हृदयं मम ॥**
ॐ श्री सिद्धिविनायक स्वामिने नमः । यथास्थानं प्रतिष्टापयामः ॥

अथ शन्तिमन्त्राः

ॐ **पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥**

**ॐ शान्तिः शान्तिः शान्तिः ॥**

॥ श्री गुरुभ्यो नमः । हरिः ॐ ॥